ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

## (वाक्य सहित)

## चतुर्थकाण्डे षष्ठः प्रश्नः

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **January 31, 2021**

## Version Notes:

**This is now the current Version 1.0 dated January 31, 2021.**

1. This replaces the earlier version 0.0 dated August 31, 2019.

2. This version has been updated with the errors found and reported till January 15, 2021.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st January 2019 |
| 2nd | Version Number | 0.0 dated 31st August 2019 |

## Table of Contents


4 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे चतुर्थं काण्डं 4

4.6 चतुर्थकाण्डे षष्ठः प्रश्नः – परिषेचन–संस्काराभिधानं....... 4

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः , हरिः ओं

# 4 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे चतुर्थं काण्डं

## 4.6 चतुर्थकाण्डे षष्ठः प्रश्नः–परिषेचन–संस्काराभिधानं

**TS 4.6.1.1**

अश्मन्नूर्जं पर्वते शिश्रियाणां ँवाते पर्जन्ये वरुणस्य शुष्मे ।

अद्भ्य ओषधीभ्यो वनस्पतिभ्योऽधि संभृतां तां न इषमूर्जं

धत्त मरुतः स्ꣳरराणाः ॥

अश्मꣴस्ते क्षुदमुं ते शुगृच्छतु यं द्विष्मः ॥

समुद्रस्य त्वाऽ*वाकया ऽग्ने परि व्ययामसि ।

पावको अस्मभ्यꣳ शिवो भव ॥

हिमस्य त्वा जरायुणा ऽग्ने परि व्ययामसि ।

पावको अस्मभ्यꣳ शिवो भव ॥

उप – [ ] 1

**TS 4.6.1.1 - Padam**

अश्मन्न् । ऊर्जम् । पर्वते । शिश्रियाणाम् । वाते । पर्जन्ये । वरुणस्य । शुष्मे ॥ अद्भ्य इत्यत् – भ्यः । ओषधीभ्य इत्योषधि – भ्यः । वनस्पतिभ्य इति वनस्पति – भ्यः । अधीति । संभृतामिति सं – भृताम् । ताम् । नः । इषम् । ऊर्जम् । धत्त । मरुतः । स<u>ꣳ</u>रराणा इति सं – रराणाः ॥ अश्मन्न् । ते । क्षुत् । अमुम् । ते । शुक् । ऋच्छतु । यम् । द्विष्मः ॥ समुद्रस्य । त्वा । अवाकया । अग्ने । परीति । व्ययामसि ॥ पावकः । अस्मभ्यमित्यस्म – भ्यम् । शिवः । भव ॥ हिमस्य । त्वा । जरायुणा । अग्ने । परीति । व्ययामसि ॥ पावकः । अस्मभ्यमित्यस्म – भ्यम् । शिवः । भव ॥ उपेति । **1 (50)**

**TS 4.6.1.2**

–ज्मन्नुप वेतसेऽवत्तरं नदीष्वा ।

अग्ने पित्तमपामसि ॥

मण्डूकि ताभिरा गहि सेमं नो यज्ञं ।

पावकवर्ण॑ँ शिवं कृधि ॥

पावक आ चितयन्त्या कृपा ।

क्षामन् रुरुच उषसो न भानुना ॥

तूर्वन् न यामन्नेतशस्य नू रण आ यो घृणे ।

न ततृषाणो अजरः ॥

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।

आ देवान् – [ ] 2

**TS 4.6.1.2 - Padam**

ज्मन्न् । उपेति । वेतसे । अवत्तरमित्यवत् – तरम् । नदीषु । आ ॥

अग्ने । पित्तम् । अपाम् । असि ॥ मण्डूकि । ताभिः । एति । गहि ।

सा । इमम् । नः । यज्ञम् ॥ पावकवर्णमिति पावक – वर्णम् ।

शिवम् । कृधि ॥ पावके । एति । चितयन्त्या । कृपा ॥ क्षामन्न् ।

रुरुचे । उषसः । न । भानुना ॥ तूर्वन्न् । न । यामन्न् । एतशस्य ।

नु । रणे । एति । यः । घृणे ॥ न । ततृषाणः । अजरः ॥ अग्ने ।

पावक । रोचिषा । मन्द्रया । देव । जिह्वया ॥ एति । देवान् । **2 (50)**

**TS 4.6.1.3**

वक्षि यक्षि च ॥

स नः पावक दीदिवो ऽग्ने देवाꣳ इहाऽऽ वह ।

उप यज्ञꣳ हविश्च नः ॥

अपामिदं न्ययनꣳ समुद्रस्य निवेशनं ।

अन्यं ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥

नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।

अन्यं ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥

नृषदे वड – [ ] **3**

**TS 4.6.1.3 - Padam**

वक्षि । यक्षि । च ॥ सः । नः । पावक । दीदिवः । अग्ने । देवान् ।
इह । एति । वह ॥ उपेति । यज्ञम् । हविः । च । नः ॥ अपाम् ।
इदम् । न्ययनमिति नि – अयनम् । समुद्रस्य । निवेशनमिति
नि – वेशनम् ॥ अन्यम् । ते । अस्मत् । तपन्तु । हेतयः ।
पावकः । अस्मभ्यमित्यस्म – भ्यम् । शिवः । भव ॥ नमः । ते ।

हरसे । शोचिषे । नमः । ते । अस्तु । अर्चिषे ॥ अन्यम् । ते ।

अस्मत् । तपन्तु । हेतयः । पावकः । अस्मभ्यमित्यस्म - भ्यम् ।

शिवः । भव ॥ नृषद इति नृ - सदे । वट् । **3 (50)**

**TS 4.6.1.4**

-फ्सुषदे वड् वनसदे वड् बर्.हिषदे वट्थ् सुवर्विदे वट् ॥

ये देवा देवानां ँयज्ञिया यज्ञियाना॰ सँवथ् सरीणमुप भागमासते ।

अहुतादो हविषो यज्ञे अस्मिन्थ् स्वयं जुहुद्ध्वं मधुनो घृतस्य ॥

ये देवा देवेष्वधि देवत्वमायन्. ये ब्रह्मणः पुर एतारो अस्य ।

येभ्यो नर्ते पवते धाम किं चन न ते दिवो न पृथिव्या अधि स्नुषु ॥

प्राणदा - [ ] **4**

**TS 4.6.1.4 - Padam**

अफ्सुषद इत्यफ्सु - सदे । वट् । वनसद इति वन - सदे । वट् ।

बर्.हिषद इति बर्.हि - सदे । वट् । सुवर्विद इति सुवः - विदे ।

वट् ॥ ये । देवाः । देवानाम् । यज्ञियाः । यज्ञियानाम् ।

सँवथ्सरीणमिति सं - वथ्सरीणम् । उपेति । भागम् । आसते ॥

अहुताद इत्यहुत - अदः । हविषः । यज्ञे । अस्मिन्न् । स्वयम् ।

जुहुद्ध्वम् । मधुनः । घृतस्य ॥ ये । देवाः । देवेषू । अधीति । देवत्वमिति देव – त्वम् । आयन्न् । ये । ब्रह्मणः । पुरएतार इति पुरः – एतारः । अस्य ॥ येभ्यः । न । ऋते । पवते । धाम । किम् । चन । न । ते । दिवः । न । पृथिव्याः । अधीति । स्नुषु ॥ प्राणदा इति प्राण – दाः । **4 (50)**

**TS 4.6.1.5**

अपानदा व्यानदाश्चक्षुर्दा वर्चोदा वरिवोदाः ।
अन्यं ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥
अग्निस्तिग्मेन शोचिषा यꣳसद्विश्वं न्यत्रिणं ।
अग्निर्नो वꣳसते रयिं ॥
सैना ऽनीकेन सुविदत्रो अस्मे यष्टा देवाꣳ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्–दिदीहि ॥ **5**

**TS 4.6.1.5 - Padam**

अपानदा इत्यपान – दाः । व्यानदा इति व्यान – दाः । चक्षुर्दा इति चक्षुः–दाः । वर्चोदा इति वर्चः–दाः । वरिवोदा इति वरिवः–दाः ॥

अन्यम् । ते । अस्मत् । तपन्तु । हेतयः । पावकः ।

अस्मभ्यमित्यस्म – भ्यम् । शिवः । भव ॥ अग्निः । तिग्मेन ।

शोचिषा । यꣳसत् । विश्वम् । नीति । अत्रिणम् ॥ अग्निः । नः ।

वꣳसते । रयिम् ॥ सः । एना । अनीकेन । सुविदत्र इति

सु–विदत्रः । अस्मे इति । यष्टा । देवान् । आयजिष्ठ इत्या–यजिष्ठः ।

स्वस्ति ॥ अदब्धः । गोपा इति गो – पाः । उत । नः ।

परस्पा इति परः – पाः । अग्ने । द्युमदिति द्यु – मत् । उत । रेवत् ।

दिदीहि ॥ **5 (44)**

*(उप–देवान्–वट्–प्राणदा–श्चतुश्चत्वारिꣳशच्च) (A1)*

**<u>TS 4.6.2.1</u>**

य इमा विश्वा भुवनानि जुह्वदृषिर्.होता निषसादा पिता नः ।

स आशिषा द्रविणमिच्छमानः परमच्छदो वर आ विवेश ॥

विश्वकर्मा मनसा यद्विहाया धाता विधाता परमोत सन्दृक् ।

तेषामिष्टानि समिषा मदन्ति यत्र सप्तर्.षीन् पर एकमाहुः ॥

यो नः पिता जनिता यो विधाता यो नः सतो अभ्या सज्जजान । **6**

**TS 4.6.2.1 - Padam**

य । इमा । विश्वा । भुवनानि । जुह्वत् । ऋषिः । होता । निषसादेति

नि – ससाद । पिता । नः ॥ सः । आशिषेत्या – शिषा । द्रविणम् ।

इच्छमानः । परमच्छद इति परम – छदः । वरे । एति । विवेश ॥

विश्वकर्मेति विश्व–कर्मा । मनसा । यत् । विहाया इति वि–हायाः ।

धाता । विधातेति वि – धाता । परमा । उत । सन्दृगिति सं–दृक् ॥

तेषाम् । इष्टानि । समिति । इषा । मदन्ति । यत्र । सप्तर्.षीनिति

सप्त–ऋषीन् । परः । एकम् । आहुः ॥ यः । नः । पिता । जनिता ।

यः । विधातेति वि – धाता । यः । नः । सतः । अभि । एति ।

सत् । जजान ॥ **6 (50)**

**TS 4.6.2.2**

यो देवानां नामधा एक एव त७ं संप्रश्ञं भुवना यन्त्यन्या ॥

त आ ऽयजन्त द्रविण७ं स–मस्मा ऋषयः पूर्वे जरितारो न भूना ।

असूर्ता सूर्ता रजसो विमाने ये भूतानि समकृण्वन्निमानि ॥

न तं ँविदाथ य इदं जजानान्यद् युष्माकमन्तरं भवाति ।

नीहारेण प्रावृता जल्प्या चासुतृप उक्थशास–श्चरन्ति ॥

परो दिवा पर एना – [ ] **7**

**TS 4.6.2.2 - Padam**

यः । देवानाम् । नामधा इति नाम – धाः । एकः । एव । तम् ।

संप्रश्नमिति सं – प्रश्नम् । भुवना । यन्ति । अन्या ॥ ते । एति ।

अयजन्त । द्रविणम् । समिति । अस्मै । ऋषयः । पूर्वे । जरितारः ।

न । भूना ॥ असूर्ता । सूर्ता । रजसः । विमान इति वि – माने ।

ये । भूतानि । समकृण्वन्निति सं – अकृण्वन्न् । इमानि ॥ न । तम् ।

विदाथ । यः । इदम् । जजान । अन्यत् । युष्माकम् । अन्तरम् ।

भवाति ॥ नीहारेण । प्रावृताः । जल्प्या । च । असुतृप

इत्यसु – तृपः । उक्थशास इत्युक्थ – शासः । चरन्ति ॥ परः ।

दिवा । परः । एना । **7 (50)**

**TS 4.6.2.3**

पृथिव्या परो देवेभि–रसुरैर्गुहा यत् ।

क७ स्विद्–गर्भं प्रथमं दद्ध्र आपो यत्र देवाः समगच्छन्त विश्वे ॥

तमिद्–गर्भं प्रथमं दद्ध्र आपो यत्र देवाः समगच्छन्त विश्वे ।

अजस्य नाभावद्ध्येक–मर्पितं ँयस्मिन्निदं ँविश्वं भुवनमधि श्रितं ॥
विश्वकर्मा ह्यजनिष्ट देव आदिद्–गन्धर्वो अभवद् द्वितीयः ।
तृतीयः पिता जनितौषधीना – [ ] **8**

**TS 4.6.2.3 - Padam**

पृथिव्या । परः । देवेभिः । असुरैः । गुहा । यत् ॥ कम् । स्वित् ।
गर्भम् । प्रथमम् । दद्ध्रे । आपः । यत्र । देवाः । समगच्छन्तेति
सं – अगच्छन्त । विश्वे ॥ तम् । इत् । गर्भम् । प्रथमम् । दद्ध्रे ।
आपः । यत्र । देवाः । समगच्छन्तेति सं – अगच्छन्त । विश्वे ॥
अजस्य । नाभौ । अधीति । एकम् । अर्पितम् । यस्मिन्न् । इदम् ।
विश्वम् । भुवनम् । अधीति । श्रितम् ॥ विश्वकर्मेति विश्व – कर्मा ।
हि । अजनिष्ट । देवः । आत् । इत् । गन्धर्वः । अभवत् । द्वितीयः ॥
तृतीयः । पिता । जनिता । ओषधीनाम् । **8 (50)**

**TS 4.6.2.4**

–मपां गर्भं ँव्यदधात् पुरुत्रा ॥
चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नन्नमाने ।

यदेदन्ता अददृ॒ह्न्त पूर्व आदिद् द्यावापृथिवी अप्रथेतां ॥
विश्वतश्चक्षु–रुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमति सं पतत्रै द्यावापृथिवी जनयन् देव एकः ॥
कि॒ स्विदासी–दधिष्ठान–मारंभणं कतमथ् स्वित् किमासीत् ।
यदी भूमिं जनयन् – [ ] 9

**TS 4.6.2.4 - Padam**

अपाम् । गर्भम् । वीति । अदधात् । पुरुत्रेति पुरु – त्रा ॥ चक्षुषः ।
पिता । मनसा । हि । धीरः । घृतम् । एने इति । अजनत् ।
नन्नमाने इति ॥ यदा । इत् । अन्ताः । अददृ॒ह्न्त । पूर्वे ।
आत् । इत् । द्यावापृथिवी इति द्यावा – पृथिवी । अप्रथेताम् ॥
विश्वतश्चक्षुरिति विश्वतः – चक्षुः । उत । विश्वतोमुख इति
विश्वतः – मुखः । विश्वतोहस्त इति विश्वतः – हस्तः । उत ।
विश्वतस्पादिति विश्वतः–पात् ॥ समिति । बाहुभ्यामिति बाहु–भ्याम् ।
नमति । समिति । पतत्रैः । द्यावापृथिवी इति द्यावा – पृथिवी ।
जनयन्न् । देवः । एकः ॥ किम् । स्वित् । आसीत् ।

अधिष्ठानमित्यधि – स्थानम् । आरंभणमित्या – रंभणम् । कतमत् । स्वित् । किम् । आसीत् ॥ यदि । भूमिम् । जनयन्न् । **9 (50)**

**TS 4.6.2.5**

विश्वकर्मा वि द्यामौर्णोन् महिना विश्वचक्षाः ॥

कि७ स्विद्–वनं क उ स वृक्ष आसीद्–यतो द्यावापृथिवी निष्टतक्षुः ।

मनीषिणो मनसा पृच्छतेदु तद्यदद्ध्यतिष्ठद् भुवनानि धारयन्न् ॥

या ते धामानि परमाणि या ऽवमा या मद्ध्यमा विश्वकर्मन्नुतेमा ।

शिक्षा सखिभ्यो हविषि स्वधावः स्वयं ँयजस्व तनुवं जुषाणः ॥

वाचस्पतिं ँविश्वकर्माणमूतये – [ ] **10**

**TS 4.6.2.5 - Padam**

विश्वकर्मेति विश्व – कर्मा । वीति । द्याम् । और्णोत् । महिना । विश्वचक्षा इति विश्व – चक्षाः ॥ किम् । स्वित् । वनम् । कः । उ । सः । वृक्षः । आसीत् । यतः । द्यावापृथिवी इति द्यावा – पृथिवी । निष्टतक्षुरिति निः – ततक्षुः ॥ मनीषिणः । मनसा । पृच्छत । इत् । उ । तत् । यत् ।

अद्ध्यतिष्ठदित्यधि – अतिष्ठत् । भुवनानि । धारयन्न् ॥ या । ते ।
धामानि । परमाणि । या । अवमा । या । मद्ध्यमा ।
विश्वकर्मन्निति विश्व – कर्मन्न् । उत । इमा ॥ शिक्ष ।
सखिभ्य इति सखि – भ्यः । हविषि । स्वधाव इति स्वधा – वः ।
स्वयम् । यजस्व । तनुवम् । जुषाणः ॥ वाचः । पतिम् ।
विश्वकर्माणमिति विश्व – कर्माणम् । ऊतये । **10 (50)**

**TS 4.6.2.6**

मनोयुजं ँवाजे **अद्या** हुवेम ।
स नो नेदिष्ठा हवनानि जोषते विश्वशंभू–रवसे साधुकर्मा ॥
विश्वकर्मन्. हविषा वावृधानः स्वयं ँयजस्व तनुवं जुषाणः ।
मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु ॥
विश्वकर्मन्. हविषा वर्द्धनेन त्रातारमिन्द्र–मकृणोरवद्ध्यं ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथा ऽसत् ॥
समुद्राय वयुनाय सिन्धूनां पतये नमः ( ) ।

नदीना॒ᳫ् सर्वा॑सां पि॒त्रे जु॑हु॒ता वि॒श्वक॑र्मणे॒

विश्वा ऽहा ऽम॑र्त्यᳫ् ह॒विः ॥ **11**

**TS 4.6.2.6 - Padam**

म॒नो॒यु॒जमि॑ति मनः – यु॒जम् । वाजे॑ । अ॒द्य । हु॒वे॒म॒ ॥ सः । न॒ः ।

नेदि॑ष्ठा । ह॒वनानि । जो॒ष॒ते॒ । वि॒श्व॒शंभू॑रिति वि॒श्व – शं॒भू॒ः । अ॒वसे॑ ।

सा॒धु॒कर्मे॑ति सा॒धु – क॒र्मा॒ ॥ विश्वक॑र्म॒न्निति॒ विश्व–क॒र्म॒न्न् । ह॒विषा॑ ।

वा॒वृ॒धा॒नः । स्व॒यम् । य॒ज॒स्व॒ । त॒नुव॑म् । जु॒षा॒णः ॥ मुह्य॑न्तु ।

अ॒न्ये । अ॒भित॑ः । स॒पत्ना॑ः । इ॒ह । अ॒स्माक॑म् । म॒घवे॑ति म॒घ – वा॒ ।

सू॒रिः । अ॒स्तु॒ ॥ विश्वक॑र्म॒न्निति॒ विश्व॑ – क॒र्म॒न्न् । ह॒विषा॑ ।

व॑र्द्धनेन । त्रा॒तार॑म् । इन्द्र॑म् । अ॒कृ॒णोः । अ॒व॒द्ध्यम् ॥ तस्मै॑ ।

वि॑शः । समि॑ति । अ॒न॒म॒न्त॒ । पू॒र्वीः । अ॒यम् । उ॒ग्रः । वि॒ह॒व्य॑ इति॑

वि–ह॒व्य॑ः । यथा॑ । अस॑त् ॥ स॒मु॒द्राय॑ । व॒युना॑य । सिन्धू॑नाम् ।

पत॑ये । नम॑ः ( ) ॥ न॒दीना॑म् । सर्वा॑साम् । पि॒त्रे । जु॒हु॒त ।

विश्वकर्मण इति विश्व - कर्मणे । विश्वा । अहा । अमर्त्यम् ।

हविः ॥ 11 (59)

*(जजानौ - नौ - षधीनां - भूमिं जनय - न्नूतये - नमो - नव च) (A2)*

**TS 4.6.3.1**

उदेनमुत्तरां नयाग्ने घृतेनाऽऽहुत ।

रायस्पोषेण सꣳ सृज प्रजया च धनेन च ॥

इन्द्रेमं प्रतरां कृधि सजाताना-मसद्-वशी ।

समेनं ँवर्चसा सृज देवेभ्यो भागधा असत् ॥

यस्य कुर्मो हविर्गृहे तमग्ने वर्द्धया त्वं ।

तस्मै देवा अधि ब्रवन्नयं च ब्रह्मणस्पतिः ॥

उदु त्वा विश्वे देवा - [ ] 12

**TS 4.6.3.1 - Padam**

उदिति । एनम् । उत्तरामित्युत् - तराम् । नय । अग्ने । घृतेन ।

आहुतेत्या - हुत ॥ रायः । पोषेण । समिति । सृज । प्रजयेति

प्र - जया । च । धनेन । च ॥ इन्द्र । इमम् । प्रतरामिति प्र-तराम् ।

कृधि । सजातानामिति स – जातानाम् । असत् । वशी ॥ समिति ।
एनम् । वर्चसा । सृज । देवेभ्यः । भागधा इति भाग – धाः ।
असत् ॥ यस्य । कुर्मः । हविः । गृहे । तम् । अग्ने । वर्द्धय ।
त्वम् ॥ तस्मै । देवाः । अधीति । ब्रवन्न् । अयम् । च । ब्रह्मणः ।
पतिः ॥ उदिति । उ । त्वा । विश्वे । देवाः । **12 (50)**

**<u>TS 4.6.3.2</u>**

अग्ने भरन्तु चित्तिभिः ।
स नो भव शिवतमः सुप्रतीको विभावसुः ॥
पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः ।
रायस्पोषे यज्ञपति–माभजन्तीः ॥
रायस्पोषे अधि यज्ञो अस्थाथ् समिद्धे अग्नावधि मामहानः ।
उक्थपत्र ईड्यो गृभीतस्तप्तं घर्मं परिगृह्यायजन्त ॥
ऊर्जा यद्–यज्ञमशमन्त देवा दैव्याय धर्त्रे जोष्ट्रे ।
देवश्रीः श्रीमणाः शतपयाः – [ ] **13**

**TS 4.6.3.2 - Padam**

अग्ने । भरन्तु । चित्तिभिरिति चित्ति – भिः ॥ सः । नः । भव ।

शिवतम इति शिव – तमः । सुप्रतीक इति सु – प्रतीकः ।

विभावसुरिति विभा – वसुः ॥ पञ्च । दिशः । दैवीः । यज्ञम् ।

अवन्तु । देवीः । अपेति । अमतिम् । दुर्मतिमिति दुः – मतिम् ।

बाधमानाः ॥ रायः । पोषे । यज्ञपतिमिति यज्ञ – पतिम् ।

आभजन्तीरित्या – भजन्तीः ॥ रायः । पोषे । अधीति । यज्ञः ।

अस्थात् । समिद्ध इति सं – इद्धे । अग्नौ । अधीति । मामहानः ॥

उक्थपत्र इत्युक्थ – पत्रः । ईड्यः । गृभीतः । तप्तम् । घर्मम् ।

परिगृह्येति परि–गृह्य । अयजन्त ॥ ऊर्जा । यत् । यज्ञम् । अशमन्त ।

देवाः । दैव्याय । धर्त्रे । जोष्ट्रे ॥ देवश्रीरिति देव – श्रीः ।

श्रीमणा इति श्री – मनाः । शतपया इति शत – पयाः । **13 (50)**

**TS 4.6.3.3**

परिगृह्य देवा यज्ञमायन्न् ॥

सूर्यरश्मिर्.हरिकेशः पुरस्ताथ् सविता ज्योतिरुदया॑ँ अजस्रं ।

तस्य पूषा प्रसवं ँयाति देवः संपश्यन् विश्वा भुवनानि गोपाः ॥

देवा देवेभ्यो अद्ध्वर्यन्तो अस्थुर्वीत॑ शमित्रे शमिता यजद्ध्यै ।
तुरीयो यज्ञो यत्र हव्यमेति ततः पावका आशिषो नो जुषन्तां ॥
विमान एष दिवो मद्ध्य आस्त आपप्रिवान् रोदसी अन्तरिक्षं ।
स विश्वाचीरभि – [ ] **14**

**TS 4.6.3.3 - Padam**

परिगृह्येति परि – गृह्य । देवाः । यज्ञम् । आयन्न् ॥ सूर्यरश्मिरिति सूर्य – रश्मिः । हरिकेश इति हरि – केशः । पुरस्तात् । सविता । ज्योतिः । उदिति । अयान् । अजस्रम् ॥ तस्य । पूषा । प्रसवमिति प्र – सवम् । याति । देवः । संपश्यन्निति सं – पश्यन्न् । विश्वा । भुवनानि । गोपा इति गो – पाः ॥ देवाः । देवेभ्यः । अद्ध्वर्यन्तः । अस्थुः । वीतम् । शमित्रे । शमिता । यजद्ध्यै ॥ तुरीयः । यज्ञः । यत्र । हव्यम् । *एति* । ततः । पावकाः । आशिष इत्या–शिषः । नः । जुषन्ताम् ॥ विमान इति वि–मानः । एषः । दिवः । मद्ध्ये । आस्ते । आपप्रिवानित्या – पप्रिवान् । रोदसी इति । अन्तरिक्षम् ॥ सः । विश्वाचीः । अभीति । **14 (50)**

**TS 4.6.3.4**

चष्टे घृताचीरन्तरा पूर्वमपरं च केतुं ॥
उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।
मद्ध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसः पात्यन्तौ ॥
इन्द्रं ँविश्वा अवीवृधन्थ् समुद्रव्यचसं गिरः ।
रथीतम॑ रथीनां ँवाजाना॑ सत्पतिं पतिं ॥
सुम्नहूर्यज्ञो देवा॑ आ च वक्षद्–यक्षदग्निर्देवो देवा॑ आ च वक्षत् ॥
वाजस्य ( ) मा प्रसवेनोद्ग्राभेणो–दग्रभीत् ।
**अथा** सपत्ना॑ इन्द्रो मे निग्राभेणाधरा॑ अकः ॥
उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्न् ।
**अथा** सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यतां ॥ **15**

**TS 4.6.3.4 - Padam**

चष्टे । घृताचीः । अन्तरा । पूर्वम् । अपरम् । च । केतुम् ॥ उक्षा ।
समुद्रः । अरुणः । सुपर्ण इति सु – पर्णः । पूर्वस्य । योनिम् ।
पितुः । एति । विवेश ॥ मद्ध्ये । दिवः । निहित इति नि – हितः ।

पृश्निः । अश्मा । वीति । चक्रमे । रजसः । पाति । अन्तौ ॥
इन्द्रम् । विश्वाः । अवीवृधन्न् । समुद्रव्यचसमिति समुद्र-व्यचसम् ।
गिरः ॥ रथीतममिति रथि - तमम् । रथीनाम् । वाजानाम् ।
सत्पतिमिति सत् - पतिम् । पतिम् ॥ सुम्नहूरिति सुम्न - हूः ।
यज्ञः । देवान् । एति । च । वक्षत् । यक्षत् । अग्निः । देवः । देवान् ।
एति । च । वक्षत् ॥ वाजस्य ( ) । मा । प्रसवेनेति प्र - सवेन ।
उद्ग्राभेणेत्युत् - ग्राभेण । उदिति । अग्रभीत् ॥ अथ । सपत्नान् ।
इन्द्रः । मे । निग्राभेणेति नि - ग्राभेण । अधरान् । अकः ॥
उद्ग्राभमित्युत् - ग्राभम् । च । निग्राभमिति नि - ग्राभम् । च ।
ब्रह्म । देवाः । अवीवृधन्न् ॥ अथ । सपत्नान् । इन्द्राग्नी
इतीन्द्र - अग्नी । मे । विषूचीनान् । वीति । अस्यताम् ॥ **15 (76)**

*(देवाः - शतपया - अभि - वाजस्य - षड्विꣳशतिश्च ) (A3)*

**TS 4.6.4.1**

आशुः शिशानो वृषभो न युद्ध्मो घनाघनः क्षोभण-श्चर्.षणीनां ।
संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयथ् साकमिन्द्रः ॥

संक्रन्दनेना निमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तथ् सहद्ध्वं ँयुधो नर इषुहस्तेन वृष्णा ॥
स इषुहस्तैः स निषंगिभिर्वशी स७स्रष्टा स युध इन्द्रो गणेन ।
स७ंसृष्टजिथ् सोमपा बाहुशर्द्ध्यूर्द्ध्वधन्वा प्रतिहिताभि–रस्ता ॥
बृहस्पते परि दीया– [ ] 16

**TS 4.6.4.1 - Padam**

आशुः । शिशानः । वृषभः । न । युद्ध्मः । घनाघनः । क्षोभणः ।
चर्.षणीनाम् ॥ संक्रन्दन इति सं – क्रन्दनः । अनिमिष
इत्यनि – मिषः । एकवीर इत्येक – वीरः । शतम् । सेनाः ।
अजयत् । साकम् । इन्द्रः ॥ संक्रन्दनेनेति सं – क्रन्दनेन ।
अनिमिषेणेत्यनि – मिषेण । जिष्णुना । युत्कारेणेति युत् – कारेण ।
दुश्च्यवनेनेति दुः–च्यवनेन । धृष्णुना ॥ तत् । इन्द्रेण । जयत । तत् ।
सहद्ध्वं । युधः । नरः । इषुहस्तेनेतीषु – हस्तेन । वृष्णा ॥ सः ।
इषुहस्तैरितीषु – हस्तैः । सः । निषङ्गिभिरिति निषङ्गि – भिः ।
वशी । स७स्रष्टेति सं – स्रष्टा । सः । युधः । इन्द्रः । गणेन ॥

स॒ꣳसृ॒ष्टजिदिति॒ सꣳसृष्ट – जित् । सो॒मपा इति॒ सोम – पाः ।

बा॒हु॒श॒र्द्धीति॒ बाहु – श॒र्द्धी । ऊ॒र्द्ध्वध॒न्वेत्यू॒र्द्ध्व – ध॒न्वा ।

प्रति॑हिताभि॒रिति॒ प्रति॑ – हि॒ता॒भिः॒ । अस्ता᳚ ॥ बृह॑स्पते । परीति॑ ।

दी॒य । **16 (50)**

**TS 4.6.4.2**

रथे॑न रक्षो॒हाऽमित्राꣳ॑ अप॒बाध॑मानः ।

प्र॒भ॒ञ्जन्थ् सेना᳚ः प्रमृ॒णो यु॒धा जय॑न्न॒स्माक॑-मेद्ध्यवि॒ता रथा॑नां ॥

गो॒त्र॒भिदं॑ गो॒विदं॒ वज्र॑बाहुं॒ जय॑न्त॒मज्म॑ प्रमृ॒णन्त॒-मोज॑सा ।

इ॒मꣳ स॑जाता॒ अनु॑-वीरयद्ध्व॒-मिन्द्रꣳ॑ सखा॒यो ऽनु॒ सꣳ रभ॑द्ध्वं ॥

ब॒ल॒वि॒ज्ञा॒यः-स्थवि॑रः॒ प्रवी॑रः॒ सह॑स्वान्. वा॒जी सह॑मान उ॒ग्रः ।

अ॒भिवी॑रो अ॒भिस॑त्वा सहो॒जा जैत्र॑मिन्द्र॒ रथ॒माति॑ष्ठ गो॒वित् ॥

अ॒भि गो॒त्रा॒णि॒ सह॑सा॒ गाह॑मानो ऽदा॒यो- [ ] **17**

**TS 4.6.4.2 - Padam**

रथे॑न । र॒क्षो॒हेति॑ रक्षः – हा । अ॒मित्रान् । अ॒प॒बा॒ध॒मा॒न॒

इत्य॑प – बाध॑मानः ॥ प्र॒भ॒ञ्जन्निति॑ प्र – भ॒ञ्जन्न् । सेना᳚ः ।

प्रमृण इति प्र – मृणः । युधा । जयन्न् । अस्माकम् । एधि ।
अविता । रथानाम् ॥ गोत्रभिदमिति गोत्र – भिदम् । गोविदमिति
गो – विदम् । वज्रबाहुमिति वज्र – बाहुम् । जयन्तम् । अज्म ।
प्रमृणन्तमिति प्र – मृणन्तम् । ओजसा ॥ इमम् । सजाता इति
स – जाताः । अन्विति । वीरयद्ध्वम् । इन्द्रम् । सखायः । अनु ।
समिति । रभद्ध्वम् ॥ बलविज्ञाय इति बल – विज्ञायः । स्थविरः ।
प्रवीर इति प्र – वीरः । सहस्वान् । वाजी । सहमानः । उग्रः ॥
अभिवीर इत्यभि – वीरः । अभिसत्वेत्यभि – सत्वा ।
सहोजा इति सहः – जाः । जैत्रम् । इन्द्र । रथम् । एति । तिष्ठ ।
गोविदिति गो – वित् ॥ अभीति । गोत्राणि । सहसा । गाहमानः ।
अदायः । **17 (50)**

**<u>TS 4.6.4.3</u>**

वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाडयुद्ध्यो–स्माकꣳ सेना अवतु प्र युथ्सु ॥
इन्द्र आसां–नेता बृहस्पति दक्षिणा यज्ञः पुर एतु सोमः ।

देवसेनाना-मभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे ॥
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳ शर्द्ध उग्रं ।
महामनसां भुवनच्यवानां घोषो देवानां जयता मुदस्थात् ॥
अस्माक-मिन्द्रः समृतेषु ध्वजेष्वस्माकं ँया इषवस्ता जयन्तु । **18**

**TS 4.6.4.3 - Padam**

वीरः । शतमन्युरिति शत – मन्युः । इन्द्रः ॥ दुश्च्यवन इति दुः-च्यवनः । पृतनाषाट् । अयुद्ध्यः । अस्माकम् । सेनाः । अवतु । प्रेति । युथ्स्विति युत् – सु ॥ इन्द्रः । आसाम् । नेता । बृहस्पतिः । दक्षिणा । यज्ञः । पुरः । एतु । सोमः ॥ देवसेनानामिति देव – सेनानाम् । अभिभञ्जतीनामित्यभि – भञ्जतीनाम् । जयन्तीनाम् । मरुतः । यन्तु । अग्रे ॥ इन्द्रस्य । वृष्णः । वरुणस्य । राज्ञः । आदित्यानाम् । मरुताम् । शर्द्धः । उग्रम् ॥ महामनसामिति महा – मनसाम् । भुवनच्यवानामिति भुवन – च्यवानाम् । घोषः । देवानाम् । जयताम् । उदिति । अस्थात् ॥ अस्माकम् । इन्द्रः ।

समृतेष्विति सं – ऋतेषु । ध्वजेषु । अस्माकम् । याः । इषवः ।

ताः । जयन्तु ॥ **18 (50)**

**TS 4.6.4.4**

अस्माकं ँवीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु ॥

उद्धर्.षय मघवन्ना–युधान्युथ्सत्वनां मामकानां महाꣳसि ।

उद्वृत्रहन् वाजिनां ँवाजिनान्युद्–रथानां जयतामेतु घोषः ॥

उप प्रेत जयता नरःस्थिरा वः सन्तु बाहवः ।

इन्द्रो वः शर्म यच्छत्वनाधृष्या यथा ऽसथ ॥

अवसृष्टा परा पत शरव्ये ब्रह्मसꣳशिता ।

गच्छामित्रान् प्र– [ ] **19**

**TS 4.6.4.4 - Padam**

अस्माकम् । वीराः । उत्तर इत्युत् – तरे । भवन्तु । अस्मान् । उ ।

देवाः । अवत । हवेषु ॥ उदिति । हर्.षय । मघवन्निति मघ – वन्न् ।

आयुधानि । उदिति । सत्वनाम् । मामकानाम् । महाꣳसि ॥ उदिति ।

वृत्रहन्निति वृत्र–हन्न् । वाजिनाम् । वाजिनानि । उदिति । रथानाम् ।

जयताम् । एतु । घोषः ॥ उप । प्रेति । इत । जयत । नरः । स्थिराः ।

वः । सन्तु । बाहवः ॥ इन्द्रः । वः । शर्म । यच्छतु । अनाधृष्या

इत्यना – धृष्याः । यथा । असथ ॥ अवसृष्टेत्यव – सृष्टा । परेति ।

पत । शरव्ये । ब्रह्मसꣳशितेति ब्रह्म–सꣳशिता ॥ गच्छ । अमित्रान् ।

प्रेति । **19 (50)**

**TS 4.6.4.5**

विश मैषां कञ्चनोच्छिषः ॥

मर्माणि ते वर्मभि श्छादयामि सोमस्त्वा राजाऽमृतेनाभि वस्तां ।

उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः ॥

यत्र बाणाः संपतन्ति कुमारा विशिखा इव ।

इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु ॥ **20**

**TS 4.6.4.5 - Padam**

विश । मा । एषाम् । कम् । चन । उदिति । शिषः ॥ मर्माणि । ते ।

वर्मभिरिति वर्म–भिः । छादयामि । सोमः । त्वा । राजा । अमृतेन ।

अभीति । वस्ताम् ॥ उरोः । वरीयः । वरिवः । ते । अस्तु ।

जयन्तम् । त्वाम् । अन्विति । मदन्तु । देवाः ॥ यत्र । बाणाः ।

संपतन्तीति सं – पतन्ति । कुमाराः । विशिखा इति वि – शिखाः ।
इव ॥ इन्द्रः । नः । तत्र । वृत्रहेति वृत्र – हा ।
विश्वाहेति विश्वा – हा । शर्म । यच्छतु ॥ **20 (40)**

*(दीया – दायो – जयन्त्व – मित्रान् प्र – चत्वारिꣳशच्च) (A4)*

**TS 4.6.5.1**

प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरोअग्निर्भवेह ।
विश्वा आशा दीद्यानो वि भाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥
क्रमद्ध्वमग्निना नाकमुख्यꣳ हस्तेषु बिभ्रतः ।
दिवः पृष्ठꣳ सुवर्गत्वा मिश्रा देवेभिराद्ध्वं ॥
पृथिव्या अहमुदन्तरिक्ष–माऽरुह–मन्तरिक्षाद् दिवमाऽरुहं ।
दिवो नाकस्य पृष्ठाथ् सुवर्ज्योतिरगा– [ ] **21**

**TS 4.6.5.1 - Padam**

प्राचीम् । अन्विति । प्रदिशमिति प्र–दिशम् । प्रेति । इहि । विद्वान् ।
अग्नेः । अग्ने । पुरोअग्निरिति पुरः – अग्निः । भव । इह ॥
विश्वाः । आशाः । दीद्यानः । वीति । भाहि । ऊर्जम् । नः । धेहि ।
द्विपद इति द्वि – पदे । चतुष्पद इति चतुः – पदे ॥ क्रमद्ध्वम् ।

अग्निना । नाकम् । उख्यम् । हस्तेषु । बिभ्रतः ॥ दिवः । पृष्ठम् ।

सुवः । गत्वा । मिश्राः । देवेभिः । आद्ध्वम् ॥ पृथिव्याः । अहम् ।

उदिति । अन्तरिक्षम् । एति । अरुहम् । अन्तरिक्षात् । दिवम् । एति ।

अरुहम् ॥ दिवः । नाकस्य । पृष्ठात् । सुवः । ज्योतिः ।

अगाम् । **21 (50)**

**TS 4.6.5.2**

महं ॥

सुवर्यन्तो नापेक्षन्त आ द्या॑ रोहन्ति रोदसी ।

यज्ञं ँये विश्वतोधार॑ सुविद्वा॑सो वितेनिरे ॥

अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानां ।

इयक्षमाणा भृगुभिः सजोषाः सुवर्यन्तु यजमानाः स्वस्ति ॥

नक्तोषासा समनसा विरूपे धापयेते शिशुमेक॑ समीची ।

द्यावा क्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन् द्रविणोदाः ॥

अग्ने सहस्राक्ष – [ ] **22**

**TS 4.6.5.2 - Padam**

अहम् ॥ सुवः । यन्तः । न । अपेति । ईक्षन्ते । एति । द्याम् ।

रोहन्ति । रोदसी इति ॥ यज्ञम् । ये । विश्वतोधारमिति

विश्वतः – धारम् । सुविद्वा॑ꣳस इति सु – विद्वा॑ꣳसः ।

वितेनिर इति वि – तेनिरे ॥ अग्ने । प्रेति । इहि । प्रथमः ।

देवयतामिति देव – यताम् । चक्षुः । देवानाम् । उत । मर्त्यानाम् ॥

इयक्षमाणाः । भृगुभिरिति भृगु – भिः । सजोषा इति स–जोषाः ।

सुवः । यन्तु । यजमानाः । स्वस्ति ॥ नक्तोषासा । समनसेति

स – मनसा । विरूपे इति वि – रूपे । धापयेते इति । शिशुम् ।

एकम् । समीची इति ॥ द्यावा । क्षाम । रुक्मः । अन्तः । वीति ।

भाति । देवाः । अग्निम् । धारयन्न् । द्रविणोदा इति द्रविणः – दाः ॥

अग्ने । सहस्राक्षेति सहस्र – अक्ष । **22 (50)**

**TS 4.6.5.3**

शतमूर्द्धञ्छतं ते प्राणाः सहस्रमपानाः ।

त्वꣳ साहस्रस्य राय ईशिषे तस्मै ते विधेम वाजाय स्वाहा ॥

सुपर्णोऽसि गरुत्मान् पृथिव्याꣳ सीद पृष्ठे पृथिव्याः

सीद भासाऽ*न्तरिक्षमा पृण ज्योतिषा *दिवमुत्तभान* तेजसा दिश
उद् दृꣳह ॥
आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वां ँयोनिमा सीद साद्ध्या ।
अस्मिन्थ्–सधस्थे अद्ध्युत्तरस्मिन् विश्वे देवा – [ ] **23**

**TS 4.6.5.3 - Padam**

शतमूर्द्धन्निति शत – मूर्द्धन्न् । शतम् । ते । प्राणा इति प्र–अनाः ।
सहस्रम् । अपान इत्यप – अनाः ॥ त्वम् । साहस्रस्य । रायः ।
ईशिषे । तस्मै । ते । विधेम । वाजाय । स्वाहा ॥ सुपर्ण इति
सु–पर्णः । असि । गरुत्मान् । पृथिव्याम् । सीद । पृष्ठे । पृथिव्याः ।
सीद । भासा । अन्तरिक्षम् । एति । पृण । ज्योतिषा । दिवम् ।
उदिति । स्तभान । तेजसा । दिशः । उदिति । दृꣳह ॥ आजुह्वान
इत्या – जुह्वानः । सुप्रतीक इति सु – प्रतीकः । पुरस्तात् । अग्ने ।
स्वाम् । योनिम् । एति । सीद । साद्ध्या ॥ अस्मिन्न् ।
सधस्थ इति सध – स्थे । अधीति ।
उत्तरस्मिन्नित्युत् – तरस्मिन्न् । विश्वे । देवाः । **23 (50)**

**TS 4.6.5.4**

यजमानश्च सीदत ॥

प्रेद्धो अग्ने दीदिहि पुरो नो ऽजस्रया सूर्म्या यविष्ठ ।

त्वा॑ शश्वन्त उप यन्ति वाजाः ॥

विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।

यस्माद्–योनेरुदारिथा यजे तं प्र त्वे हवी॑षि जुहुरे समिद्धे ॥

ता॑ सवितुर्वरेण्यस्य चित्रामाऽहं ँवृणे सुमतिं ँविश्वजन्यां ।

यामस्य कण्वो अदुहत् प्रपीना॑ सहस्रधारां – [ ] **24**

**TS 4.6.5.4 - Padam**

यजमानः । च । सीदत ॥ प्रेद्ध इति प्र – इद्धः । अग्ने । दीदिहि ।

पुरः । नः । अजस्रया । सूर्म्या । यविष्ठ ॥ त्वाम् । शश्वन्तः । उपेति ।

यन्ति । वाजाः ॥ विधेम । ते । परमे । जन्मन्न् । अग्ने । विधेम ।

स्तोमैः । अवरे । सधस्थ इति सध – स्थे ॥ यस्मात् । योनेः ।

उदारिथेत्युत् – आरिथ । यजे । तम् । प्रेति । त्वे इति । हवी॑षि ।

जुहुरे । समिद्ध इति सं – इद्धे ॥ ताम् । सवितुः । वरेण्यस्य ।

चित्राम् । एति । अहम् । वृणे । सुमतिमिति सु – मतिम् ।

विश्वजन्यामिति विश्व – जन्याम् ॥ याम् । अस्य । कण्वः । अदुहत् ।
प्रपीनामिति प्र–पीनाम् । सहस्रधारामिति सहस्र – धाराम् । **24 (50)**

**TS 4.6.5.5**

पयसा महीं गां ॥

सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तर्.षयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन ॥
ईदृङ् चान्यादृङ् चैतादृङ् च प्रतिदृङ् च मितश्च संमितश्च सभराः ॥
शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मा॑श्च
सत्यश्चर्तपाश्चात्य॑हाः ॥ **25**

**TS 4.6.5.5 - Padam**

पयसा । महीम् । गाम् ॥ सप्त । ते । अग्ने । समिध इति
सम् – इधः । सप्त । जिह्वाः । सप्त । ऋषयः । सप्त । धाम ।
प्रियाणि ॥ सप्त । होत्राः । सप्तधेति सप्त – धा । त्वा । यजन्ति ।
सप्त । योनीः । एति । पृणस्व । घृतेन ॥ ईदृङ् । च । अन्यादृङ् ।

च । एतादृङ् । च । प्रतिदृङ्ङिति प्रति - दृङ् । च । मितः । च ।
संमित इति सं - मितः । च । सभरा इति स - भराः ॥
शुक्रज्योतिरिति शुक्र-ज्योतिः । च । चित्रज्योतिरिति चित्र-ज्योतिः ।
च । सत्यज्योतिरिति सत्य - ज्योतिः । च । ज्योतिष्मान् । च ।
सत्यः । च । ऋतपा इत्यृत-पाः । च ।
अत्यꣳहा इत्यति - अꣳहाः ॥ **25 (50)**

**TS 4.6.5.6**

ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्चान्त्यमित्रश्च
दूरेअमित्रश्च गणः ॥
ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च विधारयः ॥
ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास एतन ।
मितासश्च संमितासश्च न ऊतये सभरसो मरुतो यज्ञे अस्मिन्निन्द्रं
दैवीर्विशो मरुतोऽनुवर्त्मानो ( ) यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मान
एवमिमं ँयजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥ **26**

**TS 4.6.5.6 - Padam**

ऋतजिदित्यृत – जित् । च । सत्यजिदिति सत्य – जित् । च । सेनजिदिति सेन – जित् । च । सुषेण इति सु – सेनः । च । अन्त्यमित्र इत्यन्ति–अमित्रः । च । दूरेअमित्र इति दूरे – अमित्रः । च । गणः ॥ ऋतः । च । सत्यः । च । ध्रुवः । च । धरुणः । च । धर्ता । च । विधर्तेति वि – धर्ता । च । विधारय इति वि–धारयः ॥ ईदृक्षासः । एतादृक्षासः । उ । स्विति । नः । सदृक्षासः । प्रतिसदृक्षास इति प्रति – सदृक्षासः । एति । इतन ॥ मितासः । च । संमितास इति सं – मितासः । च । नः । ऊतये । सभरस इति स – भरसः । मरुतः । यज्ञे । अस्मिन्न् । इन्द्रम् । दैवीः । विशः । मरुतः । अनुवर्मान इत्यनु–वर्मानः ( ) । यथा । इन्द्रम् । दैवीः । विशः । मरुतः । अनुवर्मान इत्यनु – वर्मानः । एवम् । इमम् । यजमानम् । दैवीः । च । विशः । मानुषीः । च । अनुवर्मान इत्यनु – वर्मानः । भवन्तु ॥ **26 (66)**

*(अगा॒ꣳ॒ – सहस्रा॒क्ष – दे॒वाः – स॒हस्र॑धा॒रा – मत्यꣳ॑ह॒ – अ॒नु॒वर्त्मा॑नः – षोड॑श च) (A5)*

**TS 4.6.6.1**

जी॒मूत॑स्येव भवति॒ प्रती॑क॒ꣳ॒ यद्–व॒र्मी याति॑ स॒मदा॑मु॒पस्थे᳚ ।

अना॑विद्धया त॒नुवा॑ ज॒य त्वꣳ स त्वा॒ वर्म॑णो म॒हिमा पि॑पर्तु ॥

धन्व॑ना॒ गा धन्व॑ना॒ ऽऽजिं ज॑ये॒म धन्व॑ना ती॒व्राः स॒मदो॑ जयेम ।

धनुः॒ शत्रो॑रपका॒मं कृ॑णोति॒ धन्व॑ना॒ सर्वाः᳚ प्र॒दिशो॑ जयेम ॥

व॒क्ष्यन्ती॒वेदा ग॑नीगन्ति॒ कर्णं॑ प्रि॒यꣳ सखा॑यं परिषस्वजा॒ना ।

योषे॑व शि॒ङ्क्ते वि॒तता॒ ऽधि ध॒न्वन् – [ ] **27**

**TS 4.6.6.1 - Padam**

जी॒मूत॑स्य । इ॒व । भ॒व॒ति॒ । प्रती॑कम् । यत् । व॒र्मी । याति॑ ।

स॒म॒दामिति॑ स – मदा᳚म् । उ॒पस्थ॒ इत्यु॒प – स्थे॒ ॥

अना॑विद्ध॒येत्यना᳚ – वि॒द्ध॒या॒ । त॒नुवा᳚ । ज॒य॒ । त्वम् । सः । त्वा॒ ।

वर्म॑णः । म॒हि॒मा । पि॒प॒र्तु॒ ॥ धन्व॑ना । गाः । धन्व॑ना । आ॒जिम् ।

ज॒ये॒म॒ । धन्व॑ना । ती॒व्राः । स॒म॒द इति॑ स – मदः॑ । ज॒ये॒म॒ ॥ धनुः॑ ।

शत्रोः᳚ । अ॒प॒का॒ममित्य॑प – का॒मम् । कृ॒णो॒ति॒ । धन्व॑ना । सर्वाः᳚ ।

प्रदिश इति प्र – दिशः । जयेम ॥ वक्ष्यन्ती । इव । इत् । एति ।

गनीगन्ति । कर्णम् । प्रियम् । सखायम् ।

परिषस्वजानेति परि – सस्वजाना ॥ योषा । इव । शिङ्क्ते ।

विततेति वि – तता । अधीति । धन्वन्न् । **27 (50)**

**<u>TS 4.6.6.2</u>**

ज्या इयꣳ समने पारयन्ती ॥

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।

अप शत्रून् विद्ध्यताꣳ सँविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समना ऽवगत्य ।

इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥

रथे तिष्ठन् नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।

अभीशूनां महिमानं – [ ] **28**

**<u>TS 4.6.6.2 - Padam</u>**

ज्या । इयम् । समने । पारयन्ती ॥ ते इति । आचरन्ती

इत्या – चरन्ती । समना । इव । योषा । माता । इव । पुत्रम् ।

बिभृताम् । उपस्थ इत्युप – स्थे ॥ अपेति । शत्रून् । विद्ध्यताम् ।
सँविदान इति सं – विदाने । आर्त्नी इति । इमे इति ।
विष्फुरन्ती इति वि–स्फुरन्ती । अमित्रान् ॥ बह्वीनाम् । पिता । बहुः ।
अस्य । पुत्रः । चिश्चा । कृणोति । समना । अवगत्येत्यव – गत्य ॥
इषुधिरितीषु – धिः । सङ्काः । पृतनाः । च । सर्वाः । पृष्ठे ।
निनद्ध इति नि – नद्धः । जयति । प्रसूत इति प्र – सूतः ॥ रथे ।
तिष्ठन्न् । नयति । वाजिनः । पुरः । यत्रयत्रेति यत्र–यत्र । कामयते ।
सुषारथिरिति सु – सारथिः ॥ अभीशूनाम् । महिमानम् । **28 (50)**

**TS 4.6.6.3**

पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥
तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँ॒–रनपव्ययन्तः ॥
रथवाहनँ॒ हविरस्य नाम यत्राऽऽ*युधं निहितमस्य वर्म ।
तत्रा रथमुप शग्मँ॒ सदेम विश्वाहा वयँ॒ सुमनस्यमानाः ॥
स्वादुषँ॒सदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।

चित्रसेना इषुबला अमृद्ध्राः सतोवीरा उरवो व्रातसाहाः ॥ ब्राह्मणासः – [ ] **29**

**TS 4.6.6.3 - Padam**

पनायत । मनः । पश्चात् । अन्विति । यच्छन्ति । रश्मयः ॥ तीव्रान् । घोषान् । कृण्वते । वृषपाणय इति वृष–पाणयः । अश्वाः । रथेभिः । सह । वाजयन्तः ॥ अवक्रामन्त इत्यव – क्रामन्तः । प्रपदैरिति प्र – पदैः । अमित्रान् । क्षिणन्ति । शत्रून् । अनपव्ययन्त इत्यनप – व्ययन्तः ॥ रथवाहनमिति रथ–वाहनम् । हविः । अस्य । नाम । यत्र । आयुधम् । निहितमिति नि – हितम् । अस्य । वर्म ॥ तत्र । रथम् । उपेति । शग्मम् । सदेम । विश्वाहेति विश्वा – अहा । वयम् । सुमनस्यमाना इति सु – मनस्यमानाः ॥ स्वादुषꣳसद इति स्वादु – सꣳसदः । पितरः । वयोधा इति वयः – धाः । कृच्छ्रेश्रित इति कृच्छ्रे – श्रितः । शक्तीवन्त इति शक्ति – वन्तः । गभीराः ॥ चित्रसेना इति चित्र – सेनाः । इषुबला इतीषु – बलाः ।

अमृद्ध्राः । सतोवीरा इति सतः – वीराः । उरवः ।

व्रातसाहा इति व्रात – साहाः ॥ ब्राह्मणासः । **29 (50)**

**TS 4.6.6.4**

पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।

पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशꣳस ईशत ॥

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।

यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यꣳसन्न् ॥

ऋजीते परि वृङ्ग्धि नो ऽश्मा भवतु नस्तनूः ।

सोमो अधि ब्रवीतु नो ऽदितिः – [ ] 30

**TS 4.6.6.4 - Padam**

पितरः । सोम्यासः । शिवे इति । नः । द्यावापृथिवी इति

द्यावा – पृथिवी । अनेहसा ॥ पूषा । नः । पातु । दुरितादिति

दुः – इतात् । ऋतावृध इत्यृत – वृधः । रक्ष । माकिः । नः ।

अघशꣳस इत्यघ – शꣳसः । ईशत ॥ सुपर्णमिति सु – पर्णम् ।

वस्ते । मृगः । अस्याः । दन्तः । गोभिः । सन्नद्धेति सं – नद्धा ।

पतति । प्रसूतेति प्र – सूता ॥ यत्र । नरः । समिति । च । वीति ।

च । द्रवन्ति । तत्र । अस्मभ्यमित्यस्म – भ्यम् । इषवः । शर्म ।
य॒ꣳसन्न् ॥ ऋजीते । परीति । वृङ्ग्धि । नः । अश्मा । भवतु । नः ।
तनूः ॥ सोमः । अधीति । ब्रवीतु । नः । अदितिः । **30 (50)**

**TS 4.6.6.5**

शर्म यच्छतु ॥
आ जङ्घन्ति सान्वेषां जघना॒ꣳ उप जिघ्नते ।
अश्वाजनि प्रचेतसो ऽश्वान्थ् समथ्सु चोदय ॥
अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमा॒ꣳसं परि पातु विश्वतः ॥
वनस्पते वीड्वङ्गो हि भूया अस्मथ्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धो असि वीडयस्वाऽऽस्थाता ते जयतु जेत्वानि ॥
दिवः पृथिव्याः पर्यो– [ ] **31**

**TS 4.6.6.5 - Padam**

शर्म । यच्छतु ॥ एति । जङ्घन्ति । सानु । एषाम् । जघनान् । उपेति ।
जिघ्नते ॥ अश्वाजनीत्यश्व – अजनि । प्रचेतस इति प्र – चेतसः ।

अश्वान् । समथ्स्विति समत् – सु । चोदय ॥ अहिः । इव ।
भोगैः । परीति । एति । बाहुम् । ज्यायाः । हेतिम् ।
परिबाधमान इति परि – बाधमानः ॥ हस्तघ्न इति हस्त – घ्नः ।
विश्वा । वयुनानि । विद्वान् । पुमान् । पुमा(ग्)सम् । परीति । पातु ।
विश्वतः ॥ वनस्पते । वीड्वङ्ग इति वीडु – अङ्गः । हि । भूयाः ।
अस्मथ्सखेत्यस्मत् – सखा । प्रतरण इति प्र – तरणः ।
सुवीर इति सु – वीरः ॥ गोभिः । सन्नद्ध इति सं – नद्धः ।
असि । वीडयस्व । आस्थातेत्या – स्थाता । ते । जयतु ।
जेत्वानि ॥ दिवः । पृथिव्याः । परीति । **31 (50)**

**TS 4.6.6.6**

–ज उद्भृतं ँवनस्पतिभ्यः पर्याभृत(ग्ं) सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्र(ग्ं) हविषा रथं ँयज ॥
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां ँविष्ठितं जगत् ।

स दुन्दुभे सजूरिन्द्रेण देवैर्दूरा– [ ] **32**

**TS 4.6.6.6 - Padam**

ओजः । उद्भृतमित्युत् – भृतम् । वनस्पतिभ्य इति वनस्पति–भ्यः । परीति । आभृतमित्या – भृतम् । सहः ॥ अपाम् । ओज्मानम् । परीति । गोभिः । आवृतमित्या–वृतम् । इन्द्रस्य । वज्रम् । हविषा । रथम् । यज ॥ इन्द्रस्य । वज्रः । मरुताम् । अनीकम् । मित्रस्य । गर्भः । वरुणस्य । नाभिः ॥ सः । इमाम् । नः । हव्यदातिमिति हव्य – दातिम् । जुषाणः । देव । रथ । प्रतीति । हव्या । गृभाय ॥ उपेति । श्वासय । पृथिवीम् । उत । द्याम् । पुरुत्रेति पुरु – त्रा । ते । मनुताम् । विष्ठितमिति वि – स्थितम् । जगत् ॥ सः । दुन्दुभे । सजूरिति स – जूः । इन्द्रेण । देवैः । दूरात् । **32 (50)**

**TS 4.6.6.7**

द्वीयो अप सेध शत्रून् ॥

आ क्रन्दय बलमोजो न आ धा निष्टनिहि दुरिता बाधमानः ।

अप प्रोथ दुन्दुभे दुच्छुनाꣳ इत इन्द्रस्य मुष्टिरसि वीडयस्व ॥

आ ऽमूरज प्रत्यावर्तयेमाः केतुमद् दुन्दुभि र्वावदीति ।

समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥ **33**

**TS 4.6.6.7 - Padam**

दवीयः । अपेति । सेध । शत्रून् ॥ एति । क्रन्दय । बलम् । ओजः ।

नः । एति । धाः । निरिति । स्थनिहि । दुरितेति दुः – इता ।

बाधमानः ॥ अपेति । प्रोथ । दुन्दुभे । दुच्छुनान् । इतः । इन्द्रस्य ।

मुष्टिः । असि । वीडयस्व ॥ एति । अमूः । अज । प्रत्यावर्तयेति

प्रति – आवर्तय । इमाः । केतुमदिति केतु – मत् । दुन्दुभिः ।

वावदीति ॥ समिति । अश्वपर्णा इत्यश्व–पर्णाः । चरन्ति । नः । नरः ।

अस्माकम् । इन्द्र । रथिनः । जयन्तु ॥ **33 (41)**

*(धन्वन् – महिमानं – ब्राह्मणासो – ऽदितिः – पृथिव्याः परि – दूरा – देकचत्वारिꣳशच्च) (A6)*

**TS 4.6.7.1**

यदक्रन्दः प्रथमं जायमान उद्यन्थ् समुद्रादुत वा पुरीषात् ।

श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन्न् ॥

यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अद्ध्यतिष्ठत् ।
गन्धर्वो अस्य रशनाम-गृभ्णाथ् सूरादश्वं वसवो निरतष्ट ॥
असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त - [ ] **34**

**TS 4.6.7.1 - Padam**

यत् । अक्रन्दः । प्रथमम् । जायमानः । उद्यन्नित्युत्-यन्न् । समुद्रात् ।
उत । वा । पुरीषात् ॥ श्येनस्य । पक्षा । हरिणस्य । बाहू इति ।
उपस्तुत्यमित्युप - स्तुत्यम् । महि । जातम् । ते । अर्वन्न् ॥ यमेन ।
दत्तम् । त्रितः । एनम् । आयुनक् । इन्द्रः । एनम् । प्रथमः ।
अधीति । अतिष्ठत् ॥ गन्धर्वः । अस्य । रशनाम् । अगृभ्णात् ।
सूरात् । अश्वम् । वसवः । निरिति । अतष्ट ॥ असि । यमः । असि ।
आदित्यः । अर्वन्न् । असि । त्रितः । गुह्येन । व्रतेन ॥ असि ।
सोमेन । समया । विपृक्त इति वि - पृक्तः । **34 (50)**

**TS 4.6.7.2**

आहुस्ते त्रीणि दिवि बन्धनानि ॥

त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।

उतेव मे वरुण श्छन्थ्स्यर्वन्. यत्रा त आहुः परमं जनित्रं ॥

इमा ते वाजिन्नवमार्जनानीमा शफानाᳪ सनितुर्निधाना ।

अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥

आत्मानं ते मनसाऽऽरादजाना–मवो दिवा – [ ] **35**

**TS 4.6.7.2 - Padam**

आहुः । ते । त्रीणि । दिवि । बन्धनानि ॥ त्रीणि । ते । आहुः । दिवि ।
बन्धनानि । त्रीणि । अप्स्वित्यप् – सु । त्रीणि । अन्तः । समुद्रे ॥
उत । इव । मे । वरुणः । छन्थ्सि । अर्वन्न् । यत्र । ते । आहुः ।
परमम् । जनित्रम् ॥ इमा । ते । वाजिन्न् ।
अवमार्जनानीत्यव – मार्जनानि । इमा । शफानाम् । सनितुः ।
निधानेति नि – धाना ॥ अत्र । ते । भद्राः । रशनाः । अपश्यम् ।
ऋतस्य । याः । अभिरक्षन्तीत्यभि – रक्षन्ति ।

गोपा इति गो – पाः ॥ आत्मानम् । ते । मनसा । आरात् ।

अजानाम् । अवः । दिवा । **35 (50)**

**TS 4.6.7.3**

पतयन्तं पतङ्गं ।

शिरो अपश्यं पथिभिः सुगेभि–ररेणुभिर्जेहमानं पतत्रि ॥

अत्रा ते रूपमुत्तममपश्यं जिगीषमाण–मिष आ पदे गोः ।

यदा ते मर्तो अनु भोगमानडादिद् ग्रसिष्ठ ओषधीरजीगः ॥

अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनां ।

अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं – [ ] **36**

**TS 4.6.7.3 - Padam**

पतयन्तम् । पतङ्गम् ॥ शिरः । अपश्यम् । पथिभिरिति पथि – भिः ।

सुगेभिरिति सु – गेभिः । अरेणुभिरित्यरेणु – भिः । जेहमानम् ।

पतत्रि ॥ अत्र । ते । रूपम् । उत्तममित्युत् – तमम् । अपश्यम् ।

जिगीषमाणम् । इषः । एति । पदे । गोः ॥ यदा । ते । मर्तः ।

अन्विति । भोगम् । आनट् । आत् । इत् । ग्रसिष्ठः । ओषधीः ।

अजीगः ॥ अन्विति । त्वा । रथः । अन्विति । मर्यः । अर्वन्न् ।
अन्विति । गावः । अन्विति । भगः । कनीनाम् ॥ अन्विति ।
व्रातासः । तव । सख्यम् । ईयुः । अन्विति । देवाः । ममिरे ।
वीर्यम् । **36 (50)**

**<u>TS 4.6.7.4</u>**

ते ॥

हिरण्यशृङ्गो ऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इदस्य हविरद्यमायन्. यो अर्वन्तं प्रथमो अद्ध्यतिष्ठत् ॥
ईर्मान्तासः सिलिकमद्ध्यमासः स॰ शूरणासो दिव्यासो अत्याः ।
ह॰सा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्य–मज्ममश्वाः ॥
तव शरीरं पतयिष्ण्वर्वन् तव चित्तं ँवात इव ध्रजीमान् ।
तव शृङ्गाणि विष्ठिता पुरुत्राऽरण्येषु जर्भुराणा चरन्ति ॥

उप – [ ] **37**

**<u>TS 4.6.7.4 - Padam</u>**

ते ॥ हिरण्यशृङ्ग इति हिरण्य – शृङ्गः । अयः । अस्य । पादाः ।
मनोजवा इति मनः – जवाः । अवरः । इन्द्रः । आसीत् ॥ देवाः ।

इत् । अस्य । हविरद्यमिति हविः – अद्यम् । आयन्न् । यः ।
अर्वन्तम् । प्रथमः । अद्ध्यतिष्ठदित्यधि – अतिष्ठत् ॥ ईर्मान्तास
इतीर्म–अन्तासः । सिलिकमद्ध्यमास इति सिलिक–मद्ध्यमासः ।
समिति । शूरणासः । दिव्यासः । अत्याः ॥ हꣳसाः । इव । श्रेणिश
इति श्रेणि – शः । यतन्ते । यत् । आक्षिषुः । दिव्यम् । अज्मम् ।
अश्वाः ॥ तव । शरीरम् । पतयिष्णु । अर्वन्न् । तव । चित्तम् । वातः ।
इव । ध्रजीमान् ॥ तव । शृङ्गाणि । विष्ठितेति वि – स्थिता । पुरुत्रेति
पुरु – त्रा । अरण्येषु । जर्भुराणा । चरन्ति ॥ उप । **37 (50)**

**TS 4.6.7.5**

प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीद्ध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चात् कवयो यन्ति रेभाः ॥
उप प्रागात् परमं यथ् सधस्थमर्वाꣳ अच्छा पितरं मातरं च ।
अद्या देवान् जुष्टतमो हि गम्या अथाऽऽ शास्ते दाशुषे वार्याणि ॥ **38**

**TS 4.6.7.5 - Padam**

प्रेति । अगात् । शसनम् । वाजी । अर्वा । देवद्रीचेति देव–द्रीचा ।

मनसा । दीद्ध्यानः ॥ अजः । पुरः । नीयते । नाभिः । अस्य ।

अन्विति । पश्चात् । कवयः । यन्ति । रेभाः ॥ उप । प्रेति । अगात् ।

परमम् । यत् । सधस्थमिति सध – स्थम् । अर्वान् । अच्छ ।

पितरम् । मातरम् । च ॥ अद्य । देवान् । जुष्टतम इति जुष्ट – तमः ।

हि । गम्याः । अथ । एति । शास्ते । दाशुषे । वार्याणि ॥ **38 (39)**

*(विपृक्तो – दिवा – वीर्य – मुपै – कान्नचत्वारिꣳशच्च) (A7)*

**TS 4.6.8.1**

मा नो मित्रो वरुणो अर्यमा ऽऽयुरिन्द्र ऋभुक्षा मरुतः परि ख्यन्न् ।

यद्–वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥

यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति ।

सुप्राङ्जो मेम्यद् विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ॥

एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।

अभिप्रियं ँयत् पुरोडाशमर्वता त्वष्टे – [ ] **39**

**TS 4.6.8.1 - Padam**

मा । नः । मित्रः । वरुणः । अर्यमा । आयुः । इन्द्रः । ऋभुक्षा

इत्यृभु – क्षाः । मरुतः । परीति । ख्यन्न् ॥ यत् । वाजिनः ।

देवजातस्येति देव – जातस्य । सप्तेः । प्रवक्ष्याम इति

प्र – वक्ष्यामः । विदथे । वीर्याणि ॥ यत् ।

निर्णिजेति निः – निजा । रेक्णसा । प्रावृतस्य । रातिम् । गृभीताम् ।

मुखतः । नयन्ति ॥ सुप्राङिति सु – प्राङ् । अजः । मेम्यत् ।

विश्वरूप इति विश्व – रूपः । इन्द्रापूष्णोरितीन्द्रा–पूष्णोः । प्रियम् ।

अपीति । एति । पाथः ॥ एषः । छागः । पुरः । अश्वेन । वाजिना ।

पूष्णः । भागः । नीयते । विश्वदेव्य इति विश्व – देव्यः ॥

अभिप्रियमित्यभि– प्रियम् । यत् । पुरोडाशम् । अर्वता । त्वष्टा ।

इत् । **39 (50)**

**TS 4.6.8.2**

–देन७् सौश्रवसाय जिन्वति ॥

यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।

अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥

होता ऽद्ध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत श꣡ꣳस्ता सुविप्रः ।

तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणद्ध्वं ॥

यूपव्रस्का उत ये यूपवाहाश्चषालं ꣡ये अश्वयूपाय तक्षति ।

ये चार्वते पचनꣳ संभरन्त्युतो – [ ] **40**

**TS 4.6.8.2 - Padam**

एनम् । सौश्रवसाय । जिन्वति ॥ यत् । हविष्यम् । ऋतुश इत्यृतु – शः । देवयानमिति देव – यानम् । त्रिः । मानुषाः । परीति । अश्वम् । नयन्ति ॥ अत्र । पूष्णः । प्रथमः । भागः । एति । यज्ञम् । देवेभ्यः । प्रतिवेदयन्निति प्रति – वेदयन्न् । अजः ॥ होता । अद्ध्वर्युः । आवया इत्या – वयाः । अग्निमिन्ध इत्यग्निं – इन्धः । ग्रावग्राभ इति ग्राव – ग्राभः । उत । शꣳस्ता । सुविप्र इति सु – विप्रः ॥ तेन । यज्ञेन । स्वरंकृतेनेति सु – अरंकृतेन । स्विष्टेनेति सु – इष्टेन । वक्षणाः । एति । पृणद्ध्वम् ॥ यूपव्रस्का इति यूप – व्रस्काः । उत । ये । यूपवाहा इति यूप – वाहाः ।

चषालम् । ये । अश्वयूपायेत्यश्व–यूपाय । तक्षति ॥ ये । च । अर्वते ।
पचनम् । संभरन्तीति सं – भरन्ति । उतो इति । **40 (50)**

**TS 4.6.8.3**

तेषा–मभिगूर्तिर्न इन्वतु ॥

उप प्रागाथ् सुमन्मे ऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं ँविप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुं ॥
यद्–वाजिनो दाम सन्दानमर्वतो या शीर्.षण्या रशना रज्जुरस्य ।
यद्–वा घास्य प्रभृतमास्ये तृण९ं सर्वा ता ते अपि देवेष्वस्तु ॥
यदश्वस्य क्रविषो – [ ] **41**

**TS 4.6.8.3 - Padam**

तेषाम् । अभिगूर्तिरित्यभि – गूर्तिः । नः । इन्वतु ॥ उप । प्रेति ।
अगात् । सुमदिति सु – मत् । मे । अधायि । मन्म । देवानाम् ।
आशाः । उपेति । वीतपृष्ठ इति वीत – पृष्ठः ॥ अन्विति । एनम् ।
विप्राः । ऋषयः । मदन्ति । देवानाम् । पुष्टे । चकृम । सुबन्धुमिति
सु – बन्धुम् ॥ यत् । वाजिनः । दाम । सन्दानमिति सं – दानम् ।

अर्वतः । या । शीर्.षण्या । रशना । रज्जुः । अस्य ॥ यत् । वा । घ ।
अस्य । प्रभृतमिति प्र – भृतम् । आस्ये । तृणम् । सर्वा । ता । ते ।
अपीति । देवेषु । अस्तु ॥ यत् । अश्वस्य । क्रविषः । **41 (50)**

**TS 4.6.8.4**

मक्षिका ऽऽश यद्–वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥
यदूवद्ध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेध॑ शृतपाकं पचन्तु ॥
यत् ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्–भूम्यामा श्रिष ( )–न्मा तृणेषु देवेभ्यस्तदुशद्भ्यो
रातमस्तु ॥ **42**

**TS 4.6.8.4 - Padam**

मक्षिका । आश । यत् । वा । स्वरौ । स्वधिताविति स्व – धितौ ।
रिप्तम् । अस्ति ॥ यत् । हस्तयोः । शमितुः । यत् । नखेषु । सर्वा ।
ता । ते । अपीति । देवेषु । अस्तु ॥ यत् । ऊवद्ध्यम् । उदरस्य ।
अपवातीत्यप – वाति । यः । आमस्य । क्रविषः । गन्धः । अस्ति ॥

सुकृतेति सु – कृता । तत् । शमितारः । कृण्वन्तु । उत । मेधम् ।

शृतपाकमिति शृत – पाकम् । पचन्तु ॥ यत् । ते । गात्रात् ।

अग्निना । पच्यमानात् । अभीति । शूलम् । निहतस्येति

नि – हतस्य । अवधावतीत्यव – धावति ॥ मा । तत् । भूम्याम् ।

एति । श्रिषत् ( ) । मा । तृणेषु । देवेभ्यः । तत् ।

उशद्भ्य इत्युशत् – भ्यः । रातम् । अस्तु ॥ **42 (57)**

*(इ – दुतो – क्रविषः – श्रिषथ् – सप्त च) (A8)*

**TS 4.6.9.1**

ये वाजिनं परिपश्यन्ति पक्वं ँय ईमाहुः सुरभिर्निर्.हरेति ।

ये चार्वतो मा॒ऽसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥

यन्नीक्षणं मा॒ऽस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।

ऊष्मण्याऽपिधाना चरूणामङ्काः सूनाः परि भूषन्त्यश्वं ॥

निक्रमणं निषदनं ँविवर्तनं ँयच्च पड्बीशमर्वतः ।

यच्च पपौ यच्च घासिं –[ ] **43**

**TS 4.6.9.1 - Padam**

ये । वाजिनम् । परिपश्यन्तीति परि–पश्यन्ति । पक्वम् । ये । ईम् ।

आहुः । सुरभिः । निरिति । हर । इति ॥ ये । च । अर्वतः ।

मा॒ऽसभिक्षामिति मा॒ऽस – भिक्षाम् । उपासत इत्युप – आसते ।

उतो इति । तेषाम् । अभिगूर्तिरित्यभि – गूर्तिः । नः । इन्वतु ॥

यत् । नीक्षणम् । मा॒ऽस्पचन्याः । उखायाः । या । पात्राणि । यूष्णः ।

आसेचनानीत्या – सेचनानि ॥ ऊष्मण्या । अपिधानेत्यपि – धाना ।

चरूणाम् । अङ्काः । सूनाः । परीति । भूषन्ति । अश्वम् ॥

निक्रमणमिति नि – क्रमणम् । निषदनमिति नि – सदनम् ।

विवर्तनमिति वि – वर्तनम् । यत् । च । पड्बीशम् । अर्वतः ॥

यत् । च । पपौ । यत् । च । घासिम् । **43 (50)**

**TS 4.6.9.2**

जघास सर्वा ता ते अपि देवेष्वस्तु ॥

मा त्वाऽग्निर्द्ध्वनयिद्–धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।

इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वं ॥

यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।

सन्दानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति ॥

यत् ते सादे महसा शूकृतस्य पार्ष्णिया वा कशया – [ ] **44**

**TS 4.6.9.2 - Padam**

जघास । सर्वा । ता । ते । अपीति । देवेषु । अस्तु ॥ मा । त्वा ।

अग्निः । ध्वनयित् । धूमगन्धिरिति धूम – गन्धिः । मा । उखा ।

भ्राजन्ति । अभीति । विक्त । जघ्रिः ॥ इष्टम् । वीतम् ।

अभिगूर्तमित्यभि – गूर्तम् । वषट्कृतमिति वषट् – कृतम् । तम् ।

देवासः । प्रतीति । गृभ्णन्ति । अश्वम् ॥ यत् । अश्वाय । वासः ।

उपस्तृणन्तीत्युप – स्तृणन्ति । अधीवासमित्यधि – वासम् । या ।

हिरण्यानि । अस्मै ॥ सन्दानमिति सं – दानम् । अर्वन्तम् ।

पड्बीशम् । प्रिया । देवेषु । एति । यामयन्ति ॥ यत् । ते । सादे ।

महसा । शूकृतस्येति शू – कृतस्य । पार्ष्णिया । वा ।

कशया । **44 (50)**

**TS 4.6.9.3**

वा तुतोद ।

स्रुचेव ता हविषो अद्ध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥

चतुस्त्रि॒ꣳशद्–वाजिनो देवबन्धो–र्वङ्क्री–रश्वस्य स्वधितिः समेति ।

अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ॥

एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथर्तुः ।

या ते गात्राणामृतुथा कृणोमि ताता पिण्डानां प्र जुहोम्यग्नौ ॥

मा त्वा तपत् – [ ] **45**

**TS 4.6.9.3 - Padam**

वा । तुतोद ॥ स्रुचा । इव । ता । हविषः । अद्ध्वरेषु । सर्वा । ता । ते । ब्रह्मणा । सूदयामि ॥ चतुस्त्रि॒ꣳशदिति चतुः – त्रि॒ꣳशत् । वाजिनः । देवबन्धोरिति देव – बन्धोः । वङ्क्रीः । अश्वस्य । स्वधितिरिति स्व – धितिः । समिति । एति ॥ अच्छिद्रा । गात्रा । वयुना । कृणोत । परुष्परुरिति परुः – परुः । अनुघुष्येत्यनु–घुष्य । वीति । शस्त ॥ एकः । त्वष्टुः । अश्वस्य । विशस्तेति वि – शस्ता । द्वा । यन्तारा । भवतः । तथा । ऋतुः ॥ या । ते । गात्राणाम् ।

ऋतुथेत्यृतु – था । कृणोमि । ताेति ता – ता । पिण्डानाम् । प्रेति । जुहोमि । अग्नौ ॥ मा । त्वा । तपत् । **45 (50)**

**TS 4.6.9.4**

प्रिय आत्माऽपियन्तं मा स्वधितिस्तनुव आ तिष्ठिपत् ते ।

मा ते गृद्ध्नु–रविशस्ता ऽतिहाय छिद्रा गात्राण्यसिना मिथू कः ॥

न वा उ–वेतन्म्रियसे न रिष्यसि देवा॑ इदेषि पथिभिः सुगेभिः ।

हरी ते युञ्जा पृषती अभूतामुपास्थाद्–वाजी धुरि रासभस्य ॥

सुगव्यं नो वाजी स्वश्वियं पु॒ꣳसः पुत्रा॑ उत विश्वापुष॑ रयिं ( ) ।

अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनता॑

हविष्मान् ॥ **46**

**TS 4.6.9.4 - Padam**

प्रियः । आत्मा । अपियन्तमित्यपि – यन्तम् । मा । स्वधितिरिति स्व – धितिः । तनुवः । एति । तिष्ठिपत् । ते ॥ मा । ते । गृद्ध्नुः । अविशस्तेत्यवि – शस्ता । अतिहायेत्यति–हाय । छिद्रा । गात्राणि । असिना । मिथु । कः ॥ न । वै । उ । एतत् । म्रियसे । न ।

रिष्यसि । देवान् । इत् । एषि । पथिभिरिति पथि – भिः ।
सुगेभिरिति सु – गेभिः ॥ हरी इति । ते । युञ्जा । पृषती इति ।
अभूताम् । उपेति । अस्थात् । वाजी । धुरि । रासभस्य ॥
सुगव्यमिति सु – गव्यम् । नः । वाजी । स्वश्वियमिति
सु – अश्वियम् । पुꣳसः । पुत्रान् । उत । विश्वापुषमिति
विश्व –पुषम् । रयिम् ( ) ॥ अनागास्त्वमित्यनागाः – त्वम् । नः ।
अदितिः । कृणोतु । क्षत्रम् । नः । अश्वः । वनताम् ।
हविष्मान् ॥ **46 (59)**

*(घासिं – कशया – तपद् – रयिं – नव च ) (A9)*

===============

**Prasna Korvai with starting Padams of 1 to 9 Anuvaakams :-**

(अश्मन् – य इमो – देन – माशुः – प्राचीं – जीमूतस्य – यदक्रन्दो – मा नो मित्रो – ये वाजिनं – नव)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(अश्मन् – मनोयुजं – प्राचीमनु – शर्म यच्छतु – तेषामभिगूर्तिः – षट्चत्वारि॑ꣳशत्)

**First and Last Padam of Sixth Prasam of Kaandam 4 :-**

(अश्मन् – हविष्मान्)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

चतुर्थ काण्डे षष्ठः प्रश्नः समाप्तः ॥

**Details of Panchati and Padam for Kandam 4 , Prasanam 6 (TS 4.6)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 5 | 244 |
| Anuvakam 2 | 6 | 309 |
| Anuvakam 3 | 4 | 226 |
| Anuvakam 4 | 5 | 240 |
| Anuvakam 5 | 6 | 316 |
| Anuvakam 6 | 7 | 341 |
| Anuvakam 7 | 5 | 239 |
| Anuvakam 8 | 4 | 207 |
| Anuvakam 9 | 4 | 209 |
| Total → | 46 | 2331 |

**Notes:**

1. **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**